# संस्कृतम् (२०९)

## शिक्षक-अंकित-मूल्यांकनपत्रम्

पूर्णांकाः 20

निर्देशाः : i) सर्वे प्रश्नाः अनिवार्याः। प्रश्नानुसारम् अंकाः समक्षे निर्देशिताः।

ii) उत्तरपुस्तिकायाः प्रथमपृष्ठे स्वनाम, शिक्षणकेन्द्रसंख्या, शिक्षणकेन्द्रस्य नाम इति सर्वं लेखनीयम्।

**1. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत —** **2**

क. 'सत्येन रक्ष्यते........कुलं वृत्तेन रक्ष्यते॥' इति श्लोकं प्रपूर्य अन्वयसहितां व्याख्यां कुरुत? (द्रष्टव्यम्-1)

ख. 'सत्यमेवेश्वरो लोके.......सत्यान्नास्ति परं पदम्॥' इति श्लोकं प्रपूर्य भावार्थम् अपि लिखत। (द्रष्टव्यम्-1)

**2. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत —** **2**

क. 'ईशः क्व अस्ति' इति पाठस्य सारं स्वशब्देषु लिखत।(द्रष्टव्यम्- 15)

ख. भास्कराचार्यस्य परिचयं लिखत।(द्रष्टव्यम्- 9)

**3. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत —** **2**

क. पृथिव्याः परिभ्रमणविषयकम् आर्यभट्टस्य सिद्धान्तं निरूपयत। (द्रष्टव्यम्-9)

ख. 'आनन्दयति कोऽत्यर्थं...तमांसि च निहन्ति कः॥' प्रहेलिकाश्लोकं प्रपूर्य प्रहेलिकां स्पष्टयत। (द्रष्टव्यम्-1)

**4. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्देषु लिखत —** **4**

क. 'प्रेरणा' इति कथासारं विशदयत। (द्रष्टव्यम्-2)

ख. दानविषये गीतायां मतं विशदयत। (द्रष्टव्यम्-16)

**5. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्देषु लिखत —** **4**

क. 'भारतीयविज्ञानम्' पाठे उल्लिखितविदुषां सूचिं कृत्वा कालं दर्शयत। (द्रष्टव्यम्-9)

ख. 'स्वस्ति पन्थामनुचरेम' इति पाठे प्रथमांशे वर्णितानां मन्त्राणां व्याख्यां वर्णयत। (द्रष्टव्यम्-17)

**6. अधोलिखितेषु कमपि एकं विषयमधिकृत्य परियोजना-विवरणं लिखत।** **6**

क. 'शरीरमाद्यं खलु धर्मसाधनम्' इति पाठे आगतानां स्वास्थ्यसिद्धान्तानां विवरणं लिखत। (द्रष्टव्यम्-14)

ख. 'सुभाषितानि' इति पाठानुसारं धर्मस्य दश लक्षणानि तेषामर्थं च तालिकानिर्माणं कृत्वा वर्णयत।

(द्रष्टव्यम्- 1)